श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ कारुण्यस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ कारुण्यस्तबकः ॥

भजे भुजङ्गशैलेशभुजान्तरपरिष्क्रियाम्।
तनयां दुग्धजलधेर्दयामिव कृतोदयाम्॥ १ ॥

जननि जीवयितुं जगदर्दितं
दशमुखप्रमुखैस्त्रिदशारिभिः।
जनकयज्ञमहीजठरे जनिं
कृतवती भवती कृपया रमे॥ २ ॥

अकरुणा करुणा ध्रुवमम्ब ते
क्षितितले भवतीमवतार्य या।
अहह यातुपुरस्थितिवेदनां
अगमयज्जगदार्तिनिवृत्तये॥ ३ ॥

अविरतविविधापराधकारि-
ण्यपि मयि देवि दयां करिष्यसीति।
जननि मम भयातुरस्य धैर्यं
जनयति वायसदानवापदानम्॥ ४ ॥

राघवस्य हृदयं स्थिराघवत्
वायसं प्रति न वायसक्रमम्।
देवि जानकि दयारसात्त्वया
पादयोजनकृता द्रवीकृतम्॥ ५ ॥

अब्धेः कन्ये जननि महतामागसां जन्मगेहे-
ष्वस्मादृक्षेष्वपि च करुणामादधासि ध्रुवं त्वम्।
साक्षी तस्मिन् युधि दशमुखे सारसाक्षि व्यपेते
यातुस्त्रीणां कबलनविधिं याचमानो हनूमान्॥ ६ ॥

www.prapatti.com

रामस्तिष्ठतु नाम यो न विदयो जिह्रेति निर्हेतुकं
सुग्रीवैकविरोधिनं क्षितिसुते संहृत्य तं वालिनम्।
कारुण्याम्बुनिधिस्त्वमेव नियतं क्लृप्तात्मपीडं यतो
रक्षःस्त्रीनिकरं ररक्षिथ तमप्यार्द्रागसं वायसम्॥ ७॥

गुरुणा प्लवेन करुणात्मना विना
हरिणाङ्कसोदरि गुणाम्बुधे तव।
जननाधिरोगमरणादिवेदना-
वरुणालयस्य तरणाय का गतिः॥ ८॥

त्वय्येवायतते कृपा रघुपतेर्देवस्य सत्यं यतो
वैदेहि त्वदसन्निधौ भगवता वाली निरागा हतः।
निन्ये कापि वधं वधूस्तव तु सान्निध्ये त्वदङ्गव्यथां
कुर्वाणोऽप्यवितः पतन्नशरणः काको विवेकोज्झितः॥ ९॥

द्विपञ्चग्रीवाज्ञाचकित समुदञ्चन्निशिचर-
प्रपञ्चप्रक्षिप्तः पवनसुतवाले हुतवहः।
यतो जातः शीतस्तमिह भवसन्तापविवशे
कृपापूरं स्वैरं किरतु मयि लोकाम्ब भवती॥ १०॥

विष्णावुष्णांशुवंशं गतवति विबुधद्वेषिशोषाय रोषात्
एष्यत्तद् योषिदागः शतमपि कृपया क्षन्तुकामेव नूनम्।
धत्ते कन्या जनन्या गुणमिति निपुणं किंवदन्तीं विदन्ती
पूर्वं सर्वं सहायामुदयमकुरुथा भोगिशैलेन्द्रकान्ते॥ ११॥

अवितुमिह दया ते देवि मार्गत्यशक्तान्
अहमपि शरणार्थी हन्त मज्जन् भवाब्धौ।
घटनमुचितमासीदावयोर्दैवयोगात्
कलशजलधिकन्ये हातुमेतन्न युक्तम्॥ १२॥

कार्येषु कारणगुणाः नियतं भवन्ती-
त्युक्तिं सतामवितथामवधारयामः।



www.prapatti.com

चान्द्री कला च भवती च पयोधिमध्यात्
    जाते यदम्ब सुधया दयया च शीते॥ १३॥

आसादितोन्नतपदेषु गिरीशमुख्ये-
    ष्वारोढुमब्जनिलये शिथिलाभिलाषा।
नीचे तु मादृशि दयारसनिम्नगा ते
    प्राप्तादरा प्रवहतीत्यनुरूपमेतत्॥ १४॥

शौरिश्चकास्ति हृदयेषु शरीरभाजां
    तस्यापि देवि हृदयं त्वमनुप्रविष्टा।
पद्मे तवापि हृदये प्रथते दयेयं
    तामेव जाग्रदखिलातिशयां श्रयामः॥ १५॥

नित्यं विश्वं वशयति हरिर्निग्रहानुग्रहाभ्याम्
    आद्ये शक्तिं विघटयति ते हन्त कारुण्यपूरः।
ईषन्न्यूनं तदिह दयितादीशितृत्वं भवत्याः
    तच्छेषत्वं कथमितरथा देवि तुल्येऽपि भूम्नि॥ १६॥

विहितं जहतं विवेकहानात्
    अहितं कर्म च नित्यमाचरन्तम्।
अपयातगुणं हरिप्रिये मां
    कृपया केवलयैव पालयेथाः॥ १७॥

क्षणमप्यसहास्थितौ जनागः
    कमिता न क्षमितेति सानुकम्पा।
अवतारदशासु देवि रूपैः
    अनुरूपैरनुगाहसे मुकुन्दम्॥ १८॥

गलति कलितायासे श्वासे कफार्गलिते गले
    भ्रमति नयने भ्रान्ते स्वान्ते यियासुषु चासुषु।
त्वरयति दया जन्तोरन्तोत्क्रमे भवतीं रमे
    त्वमपि कृपणत्राणे प्राणेश्वरं च पराङ्मुखम्॥ १९॥

दुःखाक्रान्तं भवजलनिधिं दुस्तरं योगिवर्यैः
पापानां नस्तरितुमधुना का कथा लोकधात्रि।
एवं यद्यप्युदयति मतिस्तावकीमब्धिकन्ये
धन्ये दृष्ट्वा तदपि करुणां धैर्यमेत्यन्तरात्मा॥ २० ॥

तपोभिरिह योगिनस्तव दयामविन्दन्त याम्
अकिञ्चनतयैव साममृतसोदरि प्राप्नुमः।
समाधिपटवः श्रमादनुभवन्ति यद्दैवतं
तदेव यमुनातटीतरुगणः सुखेनान्वभूत्॥ २१ ॥

अपारपरितापकृद्भवतपातपान्धा वयं
प्रपामिव सुपावनीं तव कृपामुपासीमहि।
उदञ्चितधनञ्जयः प्रभुरुदारहेतिर्यया
ययावुदधिकन्यके तपनमध्यगः शीतताम्॥ २२ ॥

कंसारातिप्रेयसि
संसाराब्धौ भ्रमन्ननाथोऽहम्।
अम्ब तव साध्वकम्पाम्
अनुकम्पान्नावमवलम्बे॥ २३ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे कारुण्यस्तबकः ॥

www.prapatti.com